# आदर्शप्रश्नपत्रम् (2026-27)

# विषय : संस्कृतम्

**कक्षा : दशमी** **कोड न. 049**

रोल नं० | | | | | | | | | | |

समयः - 3 होराः ] [ पूर्णाङ्काः : 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 11 तथा प्रश्न 19 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः :-**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति –**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 08 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 24 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 21 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 17 अङ्काः |

www.mseducationtv.com

# खण्डः 'क'

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

स्वस्थं पर्यावरणं अस्माकं जीवनस्य आधारः अस्ति। पर्यावरणस्य आधारः पुष्पिताः पल्लविताः वृक्षाः भवन्ति। वृक्षाः ऑक्सीजनं प्रदाय पर्यावरणं स्वस्थं कुर्वन्ति। वृक्षाः पर्यवरणं सन्तुलितं कुर्वन्ति। ते यथाकालं मेघानां वर्षणे सहायकाः भवन्ति। वृक्षाः पुष्पाणां फलानाम् औषधीनाञ्च आगाराः सन्ति। वृक्षपादपानां हरीतिमा, तेषां पुष्पाणां शोभा, पक्षिणां कलरवः च शुष्कहृदयान् अपि रसविभोरान् कुर्वन्ति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(i) कस्य आधारः पुष्पिताः पल्लविताः वृक्षाः भवन्ति?
(ii) स्वस्थपर्यावरणम् अस्माकं जीवनस्य कः?
(iii) किं प्रदाय वृक्षाः पर्यावरणं स्वस्थं कुर्वन्ति?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(i) वृक्षाः यथाकालं केषां वर्षणे सहायकाः भवन्ति?
(ii) वृक्षाः कस्य आगाराः सन्ति?
(iii) वृक्षाणां शोभाः पक्षिणां कलरवः च किं कुर्वन्ति?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) के पर्यावरणं सन्तुलितं कुर्वन्ति?
(क) मेघाः (ख) वृक्षाः
(ग) ऑक्सीजन (घ) कलरवः

(ii) वृक्षाः यथाकालं केषां वर्षणे सहायकाः भवन्ति?
(क) पादपानाम् (ख) पक्षिणाम्
(ग) मेघानाम् (घ) फलानाम्

(iii) 'पल्लविताः वृक्षाः' अत्र विशेषणपदं किम्?
(क) वृक्षाः (ख) पल्लविताः
(ग) पल्लवित (घ) वृक्ष

www.mseducationtv.com

(iv) 'प्रदाय' अत्र कः प्रत्ययः?

(क) क्त्वा (ख) तुमुन्

(ग) क्त (घ) ल्यप्

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. भवान् विशालः। अमेरिका–वास्तव्यं स्वमित्रं मयङ्कं प्रति नैनीतालविषये लिखितं पत्रं मञ्जूषाप्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत- 4×1=4

परीक्षाभवनम्
तिथिः – क.ख.ग.

प्रिय मित्र मयङ्क,

नमो नमः। गतमासे आवयोः दूरभाषेण (1) .................... अभवत्। ह्यः एव अत्र (2) .................. आरभत। अनेके (3) .................. तं द्रष्टुम् दूरतः आगताः आसन्। अत्रत्यानि प्राकृतिकदृश्यानि आकर्षकाणि (4) .................. च सन्ति। अहम् इच्छामि यद् ईदृशे अवसरे भवान् अपि भारते आगच्छेत्।

सस्नेहम्,

भवतां मित्रम्,
विशालः।

**मञ्जूषा**

| |
|---|
| यात्रिणः, वार्तालापः, मनोरमाणि, हिमपातः |

3. निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत - 4×1=4

www.mseducationtv.com



(1) प्रभाते सूर्योदयस्य समये विद्यालये ....................... भवति।

(2) सर्वे छात्राः पङ्क्तिबद्धाः सन्तः .................. तिष्ठन्ति।

(3) अग्रे आचार्यः छात्राणां ..................... करोति।

(4) सर्वे मिलित्वा .................... गायन्ति।

**मञ्जूषा**

| |
|---|
| मार्गदर्शनं , अनुशासनेन , राष्ट्रगानम् , प्रार्थनासभा |

## खण्डः 'ग'

## पठित-अवबोधनम्

4. निम्नलिखितं गद्याशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत। पश्यतः एव सर्वत्र जलोपप्लवः सञ्जातः। कृषक: हर्षतिरेकेण कर्षणाविमुखः सन् वृषभौ नीत्वा गृहमगात्।

**अथवा**

आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृषकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करं आसीत्।

www.mseducationtv.com

5. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

निमित्तमुद्दिश्य हि यः प्रकुप्यति,
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै,
कथं जनस्तं परितोषयिष्यति ॥

**अथवा**

एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना ॥

6. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) परमर्थकार्श्येन पीड़ितः स बसयानं विहाय पदातिरेव प्राचलत्।

(ख) आचारः प्रथमो धर्मः।

(ग) समानशील व्यसनेषु सख्यम्।

(घ) जननी तुल्यवत्सला।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

पिता यच्छति पुत्राय बाल्ये विद्याधनम् महत् ।
पिताऽस्य किं तपस्तेपे इत्युक्तिः तत्कृतज्ञता ॥

**अन्वयः :-**

पिता (1) ...................... बाल्ये महत् (2) ....................... यच्छति। पिता अस्य किम् (3) ................ तेपे, इति उक्तिः तत् (4) ......................... ॥

**मञ्जूषा**

| |
|---|
| तपः , पुत्राय , कृतज्ञता , विद्याधनम् |

www.mseducationtv.com

7. अधः प्रदत्तं गद्याशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 3×1=3

(केवलं प्रश्नत्रयम्)

मयूरः – यतः मम नृत्यं तु प्रकृतेः आराधना। पश्य! पश्य! मम पिच्छानामपूर्वं सौन्दर्यम् (पिच्छानुद्घाट्य नृत्यमुद्रायां स्थितः सन्) न कोऽपि त्रैलोक्यां मत्सदृशः सुन्दरः। वन्यजन्तूनाम् उपरि आक्रमणं कर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि।

**प्रश्नाः :-**

(क) मयूरस्य पिच्छानां सौन्दर्यं कीदृशम्?

(ख) मयूरः कथं नृत्यमुद्रायां स्थितः भवति?

(ग) 'कृत्वा' अस्मिन् शब्दे कः प्रत्ययः प्रयुक्तः?

(घ) 'कोऽपि' अस्य पदस्य सन्धिविच्छेदः कः?

8. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 2×1=2

(केवलं प्रश्नद्वयम्)

कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम् ।

प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयः पूरम् ॥

एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम् ॥

**प्रश्नाः :-**

(क) कविः नगरात् कुत्र गन्तुम् इच्छति?

(ख) क्षणमपि सञ्चरणम् कुत्र स्यात्?

(ग) कविः ग्रामान्ते किं प्रपश्यति?

9. रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) तत्र राजसिंहो नाम राजपुत्रः वसति स्मः। (कः/कुत्र)

(ख) सुराधिपः ताम् अपृच्छत्? (कस्य/काम्)

(ग) पुत्रं द्रष्टुं सः प्रस्थितः। (कः / कम्)

(घ) सः भारवेदनया क्रन्दति स्म। (कम् / कया)

www.mseducationtv.com

10. प्रश्नपत्रे लिखितश्लोकान् विहाय **'शेमुषी भाग-2'** पुस्तकाद् एकं श्लोकं संस्कृतभाषया लिखत। 1x4=4

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

11. दीर्घसन्धेः अथवा विसर्गसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

12. बहुव्रीहिसमासस्य अथवा द्वन्द्वसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

13. करणकारकस्य अथवा सम्प्रदानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

14. यथानिर्दिष्टं शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) 'बालक' शब्दस्य प्रथमा - द्विवचने।

(ख) 'लता' शब्दस्य तृतीया - एकवचने।

(ग) 'कवि' शब्दस्य पञ्चमी - द्विवचने।

(घ) 'राम' शब्दस्य चतुर्थी - बहुवचने।

(ड़) 'किम्' (पुल्लिङ्ग) शब्दस्य द्वितीया - एकवचने।

(च) 'पितृ' शब्दस्य प्रथमा - बहुवचने।

15. यथानिर्दिष्टं धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) 'भू' (भव्) धातोः लट्लकारस्य, प्र.पु., बहुवचने।

(ख) 'पठ्' धातोः लृट्लकारस्य, म.पु., एकवचने।

(ग) 'गम्' (गच्छ्) धातोः लोट्लकारस्य, म.पु., द्विवचने।

(घ) 'अस्' धातोः लङ्लकारस्य, प्र.पु. बहुवचने।

(ङ) 'हन्' धातोः लट्लकारस्य, उ.पु., एकवचने।

(च) 'लिख्' धातोः लृट्लकारस्य, प्र. पु., एकवचने।

www.mseducationtv.com

16. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नत्रयम्) 3×1=3

(क) राजन् ! अलं .............. । (कोलाहलं / दाक्षिण्येन)

(ख) .............. निकषा नदी वहति। (ग्रामं / ग्रामेण)

(ग) मोहनः ............ प्रति गच्छति। ( गृहात् / गृहम्)

(घ) रामः लवकुशौ ................. उपवेशयति। ( आसनार्धं / आसनार्धस्य)

17. अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत। (केवलं प्रश्नद्वयम्) 2×1=2

(क) यत्र हरितिमा ............ शुचि पर्यावरणम्। (तत्र / कुत्र)

(ख) पर्यावरणस्य संरक्षणम् .......... प्रकृतेः आराधना। (एव /तत्र)

(ग) ............ समयस्य सदुपयोगः करणीयः। (अत्र /सदा)

18. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

(क) आकृष्य (ख) प्रस्थितौ (ग) विशीर्णाः

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

19. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17

(क) 'अस्मात् + नगरात्' अत्र किं सन्धियुक्तपदम्?

(i) अस्मातनगरात् (ii) अस्मान्नगरात्

(iii) अस्मात् (iv ) नगरात्

(ख) 'एकैकः' इत्यस्मिन् पदे कः सन्धिविच्छेदः?

(i) एक + एक (ii ) एका + एक

www.mseducationtv.com

(iii) एक + एकः (iv) एकः + एक

(ग) 'वृक्षोपरि' इत्यस्य पदस्य विग्रहपदं किम्?

(i) वृक्षस्य उपरि (ii) वृक्ष उपरि

(iii) वृक्षात् उपरि (iv) वृक्षेण उपरि

(घ) 'अहितम्' इत्यस्मिन् पदे कः समासः?

(i) नञ् तत्पुरुषः (ii) बहुव्रीहिः

(iii) कर्मधारयः (iv) द्वन्द्वः

(ङ) 'सम्पन्नम्' इत्यस्य पदस्य विलोमपदं किम्?

(i) सम्पन्न (ii) विपन्न

(iii) विपन्नम् (iv) सम्पन्नाम्

(च) 'कृतज्ञता' इत्यस्य पदस्य विलोमपदं किम्?

(i) कृतज्ञ (ii) कृतघ्न

(iii) कृतज्ञा (iv) कृतघ्नता

(छ) 'मुखम्' इत्यस्य पदस्य पर्यायपदं किम्?

(i) नेत्रम् (ii) मुख

(iii) वदनम् (iv) लोचनम्

(ज) 'हिमकरः' इत्यस्य पदस्य पर्यायपदं किम्?

(i) निशाकरः (ii) भानुः

www.mseducationtv.com

(iii) सूर्यः    (iv) सुतः

(झ) 'हन् + क्त' इत्यस्मिन् संयोगे किं रूपम्?

(i) हन्तः    (ii) हतः

(iii) हन्त    (iv) हताः

(ञ) 'कूर्दित्वा' इत्यस्मिन् पदे कः प्रत्ययः?

(i) तुमुन्    (ii) क्त

(iii) ल्यप्    (iv) क्त्वा

(ट) 'विंशतिः' इत्यस्मिन् पदे किं संख्यावाचिपदम्?

(i) 25    (ii) 20

(iii) 30    (iv) 50

(ठ) '40' इत्यस्य पदस्य किं संख्यावाचिपदम्?

(i) पञ्चाशत्    (ii) त्रिंशत्

(iii) चत्वारिंशत्    (iv) षोडश

(ड) 'तुल्यवत्सला जननी' अत्र किं विशेषणपदम्?

(i) तुल्यवत्सला    (ii) जननी

(iii) सुरभि    (iv) माता

(ढ) 'कुमारयोः कुशलवयोः' अत्र किं विशेष्यपदम्?

(i) कुमार    (ii) कुशलवयोः

www.mseducationtv.com

(iii) कुमारयोः (iv) लवकुश

(ण) 'त' वर्णस्य उच्चारणस्थानं किम्?

(i) कण्ठ (ii) तालु

(iii) दन्त (iv) मूर्धा

(त) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत-

रामः प्रातः ...................... व्यायामं करोति।




(i) सप्तवादने (ii) नववादने

(iii) सार्धपञ्चवादने (iv) दशवादने

(थ) रमा ..................... कार्यालयं गच्छति।




(i) दशवादने (ii) सप्तवादने

(iii) अष्टवादने (iv) पञ्चवादने

www.mseducationtv.com